२८२४

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

अथ.

व पञ्चमुखी

एकमुखिहनुमत्कवच

प्रारंभः

देवप्रयाग (गढ़वाल-हिमालय)

CC-0 Chakradhar Joshi and Sons, Nakshara Vedhshala Library, Dev Prayag. Digitized by eGangotri

व्यवस्थापक- पं. चक्रधर जोशी

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

॥ ॥ अथ एकमुखिहनुमत्कवचप्रारंभः ॥ ॥
श्रीगणेशायनमः॥ॐ श्रीहनुमते नमः ॥एकदा
सुखमासीनं शंकरं लोकशंकरं। पप्रच्छ गिरि-
जा कांतं कर्पूरधवलंशिवम्॥१॥ पार्वत्युवाच॥
भगवन्देवदेवेश लोकनाथ जगद्गुरो। शोका-
कुलानां लोकानां केन रक्षा भवेद्ध्रुवम् ॥ २ ॥
संग्रामे संकटे घोरे भूतप्रेतादिके भये । दुःख-
दावाग्निसंतप्तचेतसां दुःखभागिनाम् ॥ ३ ॥
ईश्वर उवाच ॥ शृणु देवि प्रवक्ष्यामि लोका-
नां हितकाम्यया ॥ ४ ॥ विभीषणाय रामेण

CC-0 Chakradhar Joshi and Sons, Nakshara Vedhshala Library, Dev Prayag. Digitized by eGangotri

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

प्रेम्णा दत्तं च यत्पुरा। कवच कपिनाथस्य वा
युपुत्रस्यधीमतः। गुह्यं ते संप्रवक्ष्यामिविशेषा-
च्छृणु सुंदरि ॥ ९ ॥ ॐ अस्य श्रीहनुमत्कव-
चस्तोत्रमंत्रस्य श्रीरामचंद्र ऋषिः। अनुष्टुप्
छंदः। श्रीमहावीरो हनुमान् देवता। मारुता-
त्मज इति बीजं। ॐअंजनीसूनुरिति शक्तिः।
ॐहैं ह्रीं ह्रौं इति कवचं। ॐस्वाहा इति कीलकं।
लक्ष्मणप्राणदाता इति बीजं। मम सकलकार्य-
सिद्ध्यर्थे जपे विनियोगः। अथ न्यासः॥ॐह्रां
अंगुष्ठाभ्यां नमः।ॐह्रीं तर्जनीभ्यां नमः ॐ ह्रूं

CC-0 Chakradhar Joshi and Sons, Nakshara Vedhshala Library, Dev Prayag. Digitized by eGangotri

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

मध्यमाभ्यां नमः।ॐ ह्रैं अनामिकाभ्यांनमः॥
ॐ ह्रौं कनिष्ठिकाभ्यां नमः।ॐ ह्रः करतलकर-
पृष्ठाभ्यांनमः॥ॐ अंजनीसूनवे हृदयाय नमः
ॐ रुद्रमूर्तये सिरसे स्वाहा॥ ॐ वायुसुतात्मने
शिखायै वषट्॥ॐ वज्रदेहाय कवचाय हुं ॥ॐ
रामदूताय नेत्रत्रयायवौषट्॥ ॐ ब्रह्मास्त्रनिवा-
रणाय फट्॥ रामदूताय विद्महे कपिराजाय
धीमहि।तन्नो हनुमत् प्रचोदयात्॥ॐ हुंफट् इ-
ति दिग्बंधः॥ॐ ध्यायेद्बालदिवाकरद्युतिनिभं
देवारिदर्पापहं देवेंद्रप्रमुखप्रशस्तयशसं देदी-

CC-0 Chakradhar Joshi and Sons, Nakshatra Vedhshala Library, Dev Prayag. Digitized by eGangotri

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

प्यमानं रुचा ॥ सुग्रीवादिसमस्तवानरयुतं सुव्यक्ततत्त्वप्रियं संरक्तारुणलोचनं पवनजं पीतांबरालंकृतं ॥ १ ॥ उद्यन्मार्तंडकोटिप्रकटरुचियुतं चारुवीरासनस्थं मौंजीयज्ञोपवीताऽरुणरुचिरशिखाशोभितं कुंडलांकं ॥ भक्तानामिष्टदं तं प्रणतमुनिजनं वेदनादप्रमोदं ध्यायेद्देवं विधेयं प्लवगकुलपतिं गोष्पदीभूतवार्द्धिम्

१ यथाऽऽब्धिशब्दः समुद्रवाचकस्तथैवात्र वार्धिशब्दः समुद्रवाचकस्तथा च अगोष्पदं गोष्पदं संपद्यते इति गोष्पदीभूतः गोष्पदीभूतो वार्धिर्यस्मात्स गोष्पदीभूतवार्धिस्तमिति हनुमद्विशेषणम् ।

श्रीलक्ष्मीधर-विद्यामन्दिर.
देवप्रयाग (गढ़वाल-हिमालय)
व्यवस्थापक- पं. चक्रधरजोशी

CC-0 Chakradhar Joshi and Sons, Nakshara Vedhshala Library, Dev Prayag. Digitized by eGangotri

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

॥२॥ वज्रांगं पिंगकेशाढ्यं स्वर्णकुंडलमंडितं ॥
नियुद्धकुशलं कर्मपारावारपराक्रमम् ॥३॥ वा-
॥३॥ महस्ते महावृक्षं दशास्यकरखंडनं ॥ उद्यद्दक्षि-
णदोर्दंडं हनुमंतं विचिंतयेत् ॥४॥ स्फटिकाभं
स्वर्णकांतिं द्विभुजं च कृतांजलिं। कुंडलद्वयसं-
शोभिमुखांभोजं हरिं भजेत् ॥५॥ उद्यदादि-
त्यसंकाशमुदारभुजविक्रमं। कंदर्पकोटिलाव-
ण्यं सर्वविद्याविशारदं ॥ ६॥ श्रीरामहृदयानंदं
भक्तकल्पमहीरुहं । अभयं वरदं दोर्भ्यां ॥३॥
कलये मारुतात्मजं ॥ ७॥ अपराजित न

CC-0 Chakradhar Joshi and Sons, Nakshara Vedhshala Library, Dev Prayag. Digitized by eGangotri

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

मस्तेऽस्तु नमस्ते रामपूजित। प्रस्थानं च करि
ष्यामि सिद्धिर्भवतु मे सदा॥८॥ यो वारांनिधि-
मल्पपल्वलमिवोल्लंघ्यप्रतापान्वितो वैदेही-
घनशोकतापहरणो वैकुंठतत्त्वप्रियः। अक्षा[१]-
घूर्जितराक्षसेश्वरमहादर्पापहारी रणे सोऽयं
वानरपुंगवोऽवतुसदा युष्मान् समीरात्मजः॥९
वज्रांगं पिंगकेशं कनकमयलसत्कुंडलाक्रांत-
गंडं नानाविद्याधिनाथं करतलविधृतं पूर्णकुंभं
दृढं च। भक्ताभीष्टाधिकारं विदधाते च सदा

१ अक्षनामा रावणसुतः स च ऊर्जितः अतिबलिष्ठो राक्षसेश्वरः।

CC-0 Chakradhar Joshi and Sons, Nakshara Vedhshala Library, Dev Prayag. Digitized by eGangotri

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

सर्वदा सुप्रसन्नं त्रैलोक्यत्राणकारं सकलभुवि-
तलं रामदूतं नमामि ॥ १० ॥ उद्यल्लांगूलकेश- ॥ ४ ॥
प्रचयजलधरं भीममूर्तिं कपींद्रं वंदे रामांघ्रि-
पद्मभ्रमरपरिवृतं तत्वसारं प्रसन्नं । वज्रांगं व-
ज्ररूपं कनकमयलसत्कुंडलाक्रांतगंडं दंभो-
लिस्तंभसारप्रहरणविकटं भूतरक्षोऽधिनाथं
११ वामेकरे वैरिभयं वहंतं शैलं च दक्षं नि-

१ ‘दंभोलिरशनिर्द्वयोरित्यमरः’ दंभोलिर्वज्रस्तस्य स्तंभसारस्य गदायाः प्रहरणे विकटं दारुणमित्यर्थः ॥

२ दक्षं दक्षिणहस्तं निजकंठलग्नं. दधानं (हनुमंतं) आसाद्य प्राप्य भजे इति भावः । ॥ ४ ॥

CC-0 Chakradhar Joshi and Sons, Nakshara Vedhshala Library, Dev Prayag. Digitized by eGangotri

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

जकंठलग्नं । दधानमासाद्य सुवर्णवर्णं भजे
ज्वलत्कुंडलरामदूतम् ॥१२॥पद्मरागमणिकुं-
डलत्विषा पाटलीकृतकपोलमंडलं । दिव्यदे-
वकदलीवनांतरे भावयामि पवमाननंदनम्
॥१३॥ ईश्वर उवाच॥इति वदति विशेषाद्राघ-
वो राक्षसेंद्रं प्रमुदितवरचित्तो रावणस्यानुजो
हि । रघुवरवरदूतं पूजयामास भूयःस्तुतिभि-
रतिकृतार्थं स्वं परं मन्यमानः ॥ १४ ॥ वंदे
विद्युद्वलयसुभगं स्वर्णयज्ञोपवीतं कर्णद्वंद्वे क-
नकरुचिरे कुंडले धारयंतं । उच्चैर्हृष्यद्द्युम-

CC-0 Chakradhar Joshi and Sons, Nakshara Vedhshala Library, Dev Prayag. Digitized by eGangotri

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

 णिकिरणश्रेणिसंभाविताङ्गं सत्कौपीनं कपि-
वरवृतं कामरूपं कपीन्द्रम् ॥ १५ ॥ मनो-
 जवं मारुततुल्यवेगं जितेंद्रियं बुद्धिमतां वरि-
ष्ठं। वातात्मजं वानरयूथमुख्यं श्रीरामदूतं स-
ततं स्मरामि ॥ १६ ॥ ॐ नमोभगवते हृदया-
य ॐ आंजनेयाय शिरसे स्वाहा॥ ॐ रुद्रमूर्तये
शिखायै वषट् ॥ ॐ रामदूताय कवचाय हुं ॥
ॐ हनुमते नेत्रत्रयाय वौषट् ॥ ॐ अग्निगर्भाय
अस्त्रायफट्॥ ॐ नमोभगवते अंगुष्ठाभ्यां नमः॥
ॐ आंजनेयाय तर्जनीभ्यां नमः ॥ ॐ रुद्रमूर्त-

CC-0 Chakradhar Joshi and Sons, Nakshara Vedhshala Library, Dev Prayag. Digitized by eGangotri

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

ये मध्यमाभ्यांनमः ॥ ॐ हनुमते कनिष्ठिका-
भ्यां नमः ॥ ॐ अग्निगर्भाय करतलकरपृष्ठा-
भ्यां नमः ॥ अथमंत्रउच्यते ॥ ॐ ऐं ह्रीं श्रीं ह्रां
ह्रीं ह्रूं ह्रैं ह्रौं ह्रः ॥ ॐ ह्रीं ह्रौं ॐ नमो भ
गवते महाबलपराक्रमाय भूत-प्रेत-पिशाच-
शाकिनी-डाकिनी-याक्षिणी-पूतना-मारी- म-
हामारी-यक्ष-राक्षस-भैरव- वेताल- ग्रह- राक्ष-
सादिकंक्षणेन-हन हन-भंजय२मारय२शिक्ष-
य २ महामाहेश्वररुद्रावतार हुं फट् स्वाहा॥ॐ
नमोभगवतेहनुमदाख्यायरुद्राय सर्वजनमु-

CC-0 Chakradhar Joshi and Sons, Nakshara Vedhshala Library, Dev Prayag. Digitized by eGangotri

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

खस्तंभनंकुरु कुरु ह्रां ह्रीं ह्रूं ठंठंठं फट्स्वा-
हा ॐ नमोभगवते अंजनागर्भसंभूताय राम-
लक्ष्मणानंदकाय कपिसैन्यप्रकाशनाय पर्व-
तोत्पाटनाय कुमारसुग्रीवसंधानतुर्योद्घाट-
नाय कुमारब्रह्मचारिणे गंभीरशब्दोदयाय
ॐ ह्रां ह्रीं ह्रूं सर्वदुष्टनिवारणाय स्वाहा ॐ
नमो हनुमते सर्वग्रहान्भूतभविष्यद्वर्तमा-
नान् दूरस्थान् समीपस्थान् सर्वकालदुष्टबु-
द्धिमुच्चाटयोच्चाटय परबलानि क्षोभय क्षोभय
मम सर्वकार्यंसाधयसाधयहनुमते ॐ ह्रां ह्रीं

CC-0 Chakradhar Joshi and Sons, Nakshara Vedhshala Library, Dev Prayag. Digitized by eGangotri

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

ह्रूंफट्देहिॐशिवंॐसिद्धंह्रांह्रींह्रंह्रैंह्रौं
ॐस्वाहा ॐनमो हनुमते परकृतं यंत्रं मंत्रं प-
राऽहंकारभूतप्रेतपिशाचपरदृष्टिसर्वविघ्नदुर्ज-
नचेटकविद्यासर्वग्रहभयान्निवारय निवारय
किलकिल सर्वकुयंत्राणिदुष्टवाचं स्वाहा ॥ ॐ
नमो हनुमते पाहि पाहि एहि एहि सर्वग्रहभूता
ना शाकिनीडाकिनीनां विषमदुष्टानां सर्ववि-
षयानाकर्षयाकर्षय मर्दय २ भेदय २ मृत्युमु-
त्पाटय उत्पाटय शोषय शोषय ज्वल ज्वल
प्रज्वल प्रज्वल भूतमंडल प्रेतमंडल पिशाच-

CC-0 Chakradhar Joshi and Sons, Nakshara Vedhshala Library, Dev Prayag. Digitized by eGangotri

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

 मंडल निरसनाय भूतज्वर प्रेतज्वर चातुर्थि
कज्वर माहेश्वरज्वरान् छिंधि छिंधि भिंधि २
 अक्षिशूलवक्षःशूलशिरोभ्यंतरशूलगुल्मशूल-
पित्तशूलब्रह्मराक्षसकुलपरकुलनागकुलविष-
निर्विषफट् ॐ ह्रीं सर्वदुष्टग्रहान्निवारयस्वाहा
ॐ नमो हनुमते पवनपुत्राय वैश्वानरमुखाय
हन हन पापदृष्टिं षंढदृष्टिं हन हन मदीयाज्ञा-
यां स्फुर २ स्वाहा॥श्रीरामचंद्र उवाच॥हनूमा-
न् पूर्वतःपातु दक्षिणे पवनात्मजः ॥पातु प्रती-
च्यांरक्षोऽघ्नःपातुसागरपारगः॥१॥ उदीच्या-

CC-0 Chakradhar Joshi and Sons, Nakshara Vedhshala Library, Dev Prayag. Digitized by eGangotri

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

मूर्ध्वंगः पातु केसरीप्रियनंदनः । अधश्च विष्णु-
भक्तस्तु पातु मध्यं च पावनिः २ अवांतरदिशः
पातु सीताशोकविनाशनः । लंकाविदाहकः पा-
तु सर्वापद्भ्यो निरंतरम् ॥ ३ ॥ सुग्रीवसचिवः
पातु मस्तकं वायुनंदनः । भालं पातु महावीरो
भ्रुवोर्मध्ये निरंतरं ॥ ४॥ नेत्रे छायापहारी च
पातु नः प्लवगेश्वरः । कपोलौ कर्णमूले तु पातु
श्रीरामकिंकरः । नासाग्रमंजनीसूनुर्वक्त्रं पातु
हरीश्वरः । वाचं रुद्रप्रियः पातु जिह्वां पिंगल-
लोचनः ॥ ६ ॥ पातु दंतान् फाल्गुनेष्टश्चिबु-

CC-0 Chakradhar Joshi and Sons, Nakshara Vedhshala Library, Dev Prayag. Digitized by eGangotri

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

कं दैत्यपादहृत् । पातु कंठं च दैत्यारिः स्कंधौ
पातु सुरार्चितः ॥ ७ ॥ भुजौ पातु महातेजाः
॥ ८ ॥ करौ च चरणायुधः। नखान्नखायुधः पातु कु-
क्षिं पातु कपीश्वरः ॥ ८ ॥ वक्षोमुद्रापहारी च
पातु पार्श्वे भुजायुधः । लंकाविभंजनःपातु पृ-
ष्ठदेशे निरंतरम् ॥ ९ ॥ नाभिं च रामदूतस्तु
कटिं पात्वनिलात्मजः । गुह्यं पातु महाप्राज्ञः
सक्थिनी च शिवप्रियः ॥१०॥ ऊरू च जानु-
नी पातु लंकाप्रासादभंजनः। जंघे पातु महा- ॥८॥
बाहुर्गुल्फौ पातु महाबलः ॥ ११ ॥ अचलो-

CC-0 Chakradhar Joshi and Sons, Nakshara Vedhshala Library, Dev Prayag. Digitized by eGangotri

CC-0 Pt. Chakradhar Joshi and Sons. Dev Prayag. Digitized by eGangotri

द्धारकः पातु पादौ भास्करसन्निभः । पादांते
सर्वसत्त्वाढ्यः पातु पादांगुलीस्तथा ॥१२॥ स-
र्वांगानि महाशूरो पातु रोमाणि चात्मवान् ।
हनुमत्कवचं यस्तु पठेद्विद्वान् विचक्षणः ॥१३॥
स एव पुरुषः श्रेष्ठो भुक्तिं मुक्तिं च विंदति ।
त्रिकालमेककालं वा पठेन्मासत्रयं सदा ॥१४॥
सर्वान्रिपून्क्षणेजित्वा स पुमान्श्रियमाप्नुया-
त ॥ मध्यरात्रे जले स्थित्वा सप्तवारं पठेद्यदि
॥१५॥ क्षयाऽपस्मारकुष्ठादितापत्रयनिवारण
म् ॥ आर्किवारेऽश्वत्थमूले स्थित्वा पठति यः

१ शनिवारे. २ अश्वत्थमूले, पिप्पलमूले ।

CC-0 Chakradhar Joshi and Sons, Nakshara Vedhshala Library, Dev Prayag. Digitized by eGangotri

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

पुमान् ॥ १६ ॥ अचलां श्रियमाप्नोति संग्रामे
विजयी भवेत् ॥१७॥ यःकरे धारयेन्नित्यं स
पुमान् श्रियमाप्नुयात् ॥ विवादे दिव्यकाले च
द्यूते राजकुले रणे ॥ १८ ॥ भूतप्रेतमहादुर्गे
रणे सागरसंप्लुवे ॥ दशवारं पठेद्रात्रौ मिताहा-
रो जितेन्द्रियः ॥ १९ ॥ विजयं लभते लोके
मानवेषु नराधिपः ॥ सिंहव्याघ्रभये चोग्रे शर-
शस्त्रास्त्रपातने ॥ २० ॥ शृंखलाबंधने चैव का
राग्रहणकारणे ॥ कायस्तंभे वह्निदाहेगात्ररोगे
च दारुणे ॥ २१ ॥ शोके महारणे चैव ब्रह्मग्र-

CC-0 Chakradhar Joshi and Sons, Nakshara Vedhshala Library, Dev Prayag. Digitized by eGangotri

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

हविनाशने। सर्वदा तु पठेन्नित्यं जयमाप्नोत्य-
संशयः ॥ २२ ॥ भूर्जे वा वसने रक्ते क्षौमे वा
तालपत्रके । त्रिगंधेनाथवा मष्या लिखित्वा
धारयेन्नरः ॥२३॥ पंचसप्तत्रिलोहैर्वा गोपितं
कवचं शुभं। गले वा बाहुमूले वा कंठे शिरसि धा-
रितं॥२४॥सर्वान् कामानवाप्नोति सत्यं श्रीरा-
मभाषितम् ॥२५॥ उल्लंघ्य सिंधोः सलिलं स-
लीलं यः शोकवह्निं जनकात्मजायाः ।आदाय
तेनैव ददाह लंकां नमामि तं प्राञ्जलिमांजनेय
म् ॥२६॥ ॐ हनूमानंजनीसूनुर्वायुपुत्रो महा-

CC-0 Chakradhar Joshi and Sons, Nakshara Vedhshala Library, Dev Prayag. Digitized by eGangotri

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

बलः । रामेष्टः फाल्गुनसखः पिंगाक्षोऽमित-
विक्रमः ॥ २७॥ उदधिक्रमणश्चैव सीताशो-
कविनाशनः । लक्ष्मणप्राणदाता च दशग्री-
वस्य दर्पहा ॥ २८ ॥ द्वादशैतानि नामानि
कपींद्रस्य महात्मनः । स्वापकाले प्रबोधे च
यात्राकाले च यः पठेत् ॥ २९ ॥ तस्य सर्व-
भयं नास्ति रणे च विजयी भवेत् ॥ ३० ॥
इति श्रीब्रह्मांडपुराणे नारदागास्तिसंवादे श्री-
रामचंद्रप्रोक्तं हनुमत्कवचं संपूर्णम् ॥ ॥

CC-0 Chakradhar Joshi and Sons, Nakshara Vedhshala Library, Dev Prayag. Digitized by eGangotri

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

ॐ हं हं हनुमते ह्रीं ह्रीं अंजनीपुत्राय वं वं वायुसुताय रंरं रामभक्ताय सं सं सीताशोक-निवारणाय लं लं लक्ष्मणप्राणप्रदाय क्लींकपि-सैन्याग्रजाय आं अतुलबलपराक्रमाय उद-धिलंघन पर्वतोत्पाटन, लंकापुरीदहन, गंभी-रशब्दोदय, उग्रदुष्टोच्चाटन, दशदिशाभयह-रण, साधकस्य वरप्रदाय महावीराय स्वाहा॥

इत्येक मुखि हनुमत्कवचं समाप्तम् ।

CC-0 Chakradhar Joshi and Sons, Nakshara Vedhshala Library, Dev Prayag. Digitized by eGangotri

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

अथ मंत्रउच्यते। ॐ हरिमर्कटमर्कटाय स्वाहा ॥

बीसा



बीसा

२	९	२	७
६	३	६	५
८	३	८	१
४	५	४	७

ये दो प्रकारके बीसायंत्र हैं. ऊपर इस मंत्रको लिखके इन यंत्रोंको लिखाके पासमें रखनेसे सर्वकार्यसिद्धि होजाती है.

CC-0 Chakradhar Joshi and Sons, Nakshara Vedhshala Library, Dev Prayag. Digitized by eGangotri

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

अथ पंचमुखिहनुमत्कवचप्रारंभः ।

ॐ अस्य श्रीपञ्चमुखिहनुमन्मंत्रस्य ब्रह्मारूषिर्गायत्री छंदः ।पंचमुखविधिर्रूषिः । श्रीहनुमान् देवता । ह्रीं बीजं ।श्रीं शक्तिः । क्लीं कीलकं। कवचाय हुं॥ ह्रौं अस्त्राय फट् । ईश्वर उवाच॥ अथ ध्यानं प्रवक्ष्यामि शृणु सर्वांगसुंदरम् ॥ यत्कृतं देवदेवेशि ध्यानं हनुमतः प्रियम्॥१॥ पञ्चवक्त्रं महाभीमं कपियूथसमन्वितम्। बहुभिर्दशभिर्युक्तं सर्वकामार्थसिद्धदम् ॥ २ ॥ पूर्वं तु वानरं वक्त्रं कोटिसूर्यसमप्रभम् । दंष्ट्रा-

CC-0 Chakradhar Joshi and Sons, Nakshara Vedhshala Library, Dev Prayag. Digitized by eGangotri

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

करालवदनं भ्रुकुटीकुटिलेक्षणं ॥ ३॥ अस्यैव
दक्षिणं वक्त्रं नारसिंहं महाद्भुतम् । अत्युग्रते-
जोवपुषं भीषणं भयनाशनम् ॥ ४ ॥ पश्चिमे
गारुडं वक्त्रं वक्रतुंडं महाबलं। सर्वनागप्रशमनं
सर्वभूतादिकृंतनम् ॥ ५ ॥ उत्तरे शौकरं वक्त्रं
कृष्णदीप्तनभोमयम् ॥ पाताले सिद्धवेताल-
ज्वररोगादिकृंतनम् ॥६॥ ऊर्ध्वं हयाननं घोरं
दानवांतकरं परं । येन वक्त्रेण विप्रेंद्र ताटका-
या महाहवे ॥७॥ दुर्गतेश्शरणं तस्य सर्वश-
त्रुहरं परं । ध्यात्वा पञ्चमुखं रुद्रं हनुमंतं दया-

CC-0 Chakradhar Joshi and Sons, Nakshara Vedhshala Library, Dev Prayag. Digitized by eGangotri

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

निधिम् ॥ ८ ॥ खड्गं त्रिशूलं खट्वाङ्गं पाशमं-
कुशपर्वतं । मुष्टौतुमोदकौ वृक्षं धारयंतं कमं-
डलुम् ॥९॥ भिंदिपालं ज्ञानमुद्रां दशमं मुनि-
पुंगव ।एतान्यायुधजालानि धारयंतं भयापह-
म् ॥ १० ॥ दिव्यमालांबरधरं दिव्यगंधानुले-
पनम् ॥ सर्वैश्वर्यमयं देवं हनुमद्विश्वतोमुखम्
॥ ११ ॥ पंचास्यमच्युतमनेकविचित्रवर्ण
वक्त्रंसशंखविभृतं कपिराजवीर्यम् ॥ पीताम्ब-
रादिमुकुटैरपि शोभिताङ्गं पिंगाक्षमञ्जनिसुतं
ह्यनिशं स्मरामि ॥ १२॥ मर्कटस्य महोत्सा-

CC-0 Chakradhar Joshi and Sons, Nakshara Vedhshala Library, Dev Prayag. Digitized by eGangotri

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

हं सर्वशोकविनाशनम् । शत्रुसंहारकं चैतत्क-
वचं ह्यापदं हरेत् ॥१३॥ ॐ हरिमर्कटमर्कटा-
॥१३॥ य स्वाहा ॥१४॥ ॐ नमो भगवते पंचवदनाय
पूर्वकपिमुखाय सकलशत्रुसंहारणाय स्वाहा
॥१५॥ ॐ नमो भगवते पंचवदनाय उत्तरमुखा
य आदिवराहाय सकलसम्पत्कराय स्वाहा
॥१६॥ ॐ नमो भगवते पंचवदनाय ऊर्ध्वमुखाय
हयग्रीवाय सकलजनवश्यकराय स्वाहा ॥१७॥
इति मूलमंत्रः ॥ ॐ अस्य श्रीपंचमुखिहनुमत्क- ॥१३॥
वचस्तोत्रमंत्रस्य श्रीरामचंद्रऋषिरनुष्टुप्छंदः

CC-0 Chakradhar Joshi and Sons, Nakshara Vedhshala Library, Dev Prayag. Digitized by eGangotri

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

श्रीरामचंद्रो देवता॥ सीता इति बीजम्॥ हनुमा
निति शक्तिः॥ हनुमत्प्रीत्यर्थे जपे विनियोगः॥
पुनर्हनुमानितिबीजं॥ ॐ वायुपुत्राय इति
शक्तिः। अंजनीसुतेति कीलकं॥ श्रीरामचंद्रवर-
प्रसादसिद्ध्यर्थे जपे विनियोगः॥ ॐ हं हनुम-
ते अंगुष्ठाभ्यां नमः॥ ॐ वं वायुपुत्राय तर्जनी-
भ्यां नमः॥ ॐ अंजनीसुताय मध्यमाभ्यां न-
मः॥ ॐ रामदूताय अनामिकाभ्यां नमः॥
ॐ रुद्रमूर्तये कनिष्ठिकाभ्यां नमः॥ ॐ सं सी
ताशोकनिवारणाय करतलकरपृष्ठाभ्यां नमः

CC-0 Chakradhar Joshi and Sons, Nakshara Vedhshala Library, Dev Prayag. Digitized by eGangotri

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

॥ ॐ अंजनीसुताय हृदयाय नमः ॥ ॐ रुद्रमूर्त-
ये शिरसे स्वाहा ॥ ॐ वायुपुत्राय शिखायै व-
षट् ॐ अग्निगर्भाय शिरसे स्वाहा ॥ ॐ राम-
दूताय नेत्रत्रयाय वौषट् ॥ ॐ पंचमुखहनुमते
अस्त्राय फट् ॥ अथ ध्यानं ॥ श्रीरामदूताय आं
जनेयाय वायुपुत्राय महाबलप्रचंडाय सीता-
शोकनिवारणाय महाबलप्रचंडाय लङ्कापुरीद
हनाय फाल्गुनसखाय कोलाहलसकलब्रह्मांड
विश्वरूपाय सप्तसमुद्रनिरन्तरालंघिताय पिं-
गलनयनायामितविक्रमाय सूर्यबिंबफलसेवा-

CC-0 Chakradhar Joshi and Sons, Nakshara Vedhshala Library, Dev Prayag. Digitized by eGangotri

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri
धिष्ठितनिराक्रमाय संजीवन्या, अंगदलक्ष्म-
णमहाकपिसैन्यप्राणदात्रे दशग्रीवविध्वंसना-
य रामेष्टाय सीतासहरामचंद्रवरप्रसादाय ष-
ट्प्रयोगागमपंचमुखहनुमन्मन्त्रजपे विनियो
गः ॥ ॐ हरिमर्कटमर्कटाय स्वाहा ॥ ॐ ह
रिमर्कटमर्कटाय वं,वं,वं,वं,वं,फट् स्वाहा॥ॐ
हरिमर्कटमर्कटाय फं,फं,फं,फं,फं,फट् स्वाहा
ॐ हरिमर्कटमर्कटाय खं,खं,खं,खं,खं,मार
णाय स्वाहा॥ॐ हरिमर्कटमर्कटाय ठं,ठं,ठं,ठं,
ठं,स्तंभनाय स्वाहा ॥ ॐ हरिमर्कटमर्कटाय

CC-0 Chakradhar Joshi and Sons, Nakshara Vedhshala Library, Dev Prayag. Digitized by eGangotri

श्रीलक्ष्मीधर - विद्यामन्दिर,
CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri
देवप्रयाग (गढ़वाल-हिमालय)
व्यवस्थापक- प. चक्रधरजोशी

३७०७
हनु०१६

डं,डं,डं,डं,डं, आकर्षणसकलसम्पत्करायपं
चमुखवीरहनुमते स्वाहा॥ॐ उच्चाटने ढं,ढं,ढं,
ढं,ढं,कूर्ममूर्तये पंचमुखहनुमते परयंत्र, तंत्र,
उच्चाटनायस्वाहा।ॐ कं,खं,गं,घं,जं,झं,ञं,टं
ठं,डं,ढं,णं,तं,थं,दं,धं,नं,पं,फं,बं,भं,मं,यं,रं,लं
वं,शं,षं,सं,हं,क्षं,स्वाहा॥इतिदिग्बंधः।ॐ पूर्वक
पिमुखपंचमुखहनुमान् ठं,ठं,ठं,ठं,ठं,सकलश
त्रुसंहारणाय स्वाहा॥ॐ दक्षिणमुखे पंचमुखह
नुमते करालवदनाय नरसिंहाय हां, हां, हां,
हां,-हां,सकलभूतप्रेतदमनाय स्वाहा॥ॐ प-

CC-0 Chakradhar Joshi and Sons, Nakshara Vedhshala Library, Dev Prayag. Digitized by eGangotri
श्रीलक्ष्मीधर - विद्यामन्दिर,
देवप्रयाग (गढ़वाल-हिमालय)

व्यवस्थापक ...

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

श्चिममुखे गरुडासनाय पंचमुखवीरहनुमते मं मं, मं, मं, मं, सकलविषहरायस्वाहा॥ ॐ उत्तर-मुखे आदिवाराहाय लं, लं, लं, लं, लं नृसिंहाय नीलकंठाय पंचमुखहनुमते स्वाहा ॥ अंज-नासुताय वायुपुत्राय महाबलाय रामेष्टफा-ल्गुनसखाय सीताशोकनिवारणाय लक्ष्मण-प्राणरक्षकाय कपिसैन्यप्रकाशाय दशग्रीवा-पमानदहनाय श्रीरामचंद्रवरप्रसादकाय म-हावीर्याय प्रथमब्रह्मांडनायकाय पंचमुखिह-नुमते भूत, प्रेत, पिशाच, ब्रह्मराक्षस, शा-

CC-0 Chakradhar Joshi and Sons, Nakshara Vedhshala Library, Dev Prayag. Digitized by eGangotri

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

किनी, डाकिनी, अंतरिक्ष, ग्रह, परयंत्र, परतं-
त्र, सर्वग्रहउच्चाटनाय सकलशत्रुसंहारणाय
पंचमुखहनुमद्वरप्रसादकसर्वरक्षकाय जं, जं,
जं, जं, जं, स्वाहा॥ इमं कवचं पठित्वा तु महा-
कवचं पठेन्नरः ॥ एकवारं पठेन्नित्यं सर्वशत्रु-
निवारणम् ॥ १८ ॥ द्विवारं तु पठेन्नित्यं सर्व-
शत्रुनिवारणम्॥ त्रिवारं पठते नित्यं सर्वसंप-
त्करं परम्॥ १९ ॥ चतुर्वारं पठेन्नित्यं सर्वज-
नवशीकरम् ॥ पंचवारं पठेन्नित्यं सर्वरोग-
निवारणम् ॥२०॥ षड्वारंतु पठेन्नित्यंसर्वदेव

CC-0 Chakradhar Joshi and Sons, Nakshara Vedhshala Library, Dev Prayag. Digitized by eGangotri

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

वशीकरम्॥सप्तवारं पठेन्नित्यं सर्वकामार्थसि
द्धिदम्॥२१॥अष्टवारं पठेन्नित्यं सर्वसौभाग्यदा
यकम्॥नववारं पठेन्नित्यं सर्वैश्वर्यप्रदायकम्
॥२२॥दशवारं पठेन्नित्यं त्रैलोक्यज्ञानदर्शनम्
एकादशं पठेन्नित्यं सर्वसिद्धिं लभेन्नरः॥कवच
स्मृतिमात्रेण महालक्ष्मीफलप्रदं ॥ २३ ॥ इति
श्रीचिंतामणिरामभद्रेसुदर्शनसंहितायां पंच-
मुखिहनुमत्कवचं सम्पूर्णम् ॥ ॥ ॥

CC-0 Chakradhar Joshi and Sons, Nakshara Vedhshala Library, Dev Prayag. Digitized by eGangotri

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

इदं श्रीपंचमुखिहनुमत्कवचं 'साधले' इत्युपपद धारिणार्गजाननशास्त्रिणा संशोधितम् ॥ वेदबाणाङ्कचन्द्रमिते वैक्रमीयेब्दे पौषमासे शुक्लपक्षे पंचम्याम् भौमवासरे संवत् १९५३.

तच्च मोहमय्याख्यनगर्यां भगीरथात्मजहरिप्रसादेन जगदीश्वराख्यमुद्रणालये मुद्रयित्वा प्रसिद्धिं नीतम् ।

सन १८६७ का आक्ट २५ मुजब सरकारमें रजिस्टर करके इस पुस्तकका हक्क हरिप्रसाद भगीरथजीने अपना रखा है.
विक्रमादित्य संवत् १९५४ शके १८१९.

॥ १७ ॥

CC-0 Chakradhar Joshi and Sons, Nakshara Vedhshala Library, Dev Prayag. Digitized by eGangotri

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

इस यंत्रको अष्टगंधसे लिखके सूर्यग्रहणमें गलेमें बांधै तो महाभय दूर होय सर्व रोग निवारण होय.



CC-0 Chakradhar Joshi and Sons, Nakshara Vedhshala Library, Dev Prayag. Digitized by eGangotri

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

इति

पंचमुखिहनुमत्कवचं

समाप्तम्

CC-0 Chakradhar Joshi and Sons, Nakshara Vedhshala Library, Dev Prayag. Digitized by eGangotri